# 13. दिष्ट्या गोग्रहणं स्वन्तम्

[મહાકવિ ભાસ વિરચિત ત્રિઅંકી નાટક પંચરાત્રમાંથી આ નાટ્યાંશ લેવામાં આવ્યો છે. ભાસની આ નાટ્યરચનામાં મહાભારતના મહાન વિધ્વંસક યુદ્ધને જાકારો આપી દેવામાં આવ્યો છે. પાંડવોનો અજ્ઞાતવાસ પૂરો થવામાં હોય છે તેવા સમયે દુર્યોધન એક યજ્ઞ કરે છે. આ યજ્ઞના આચાર્ય તરીકે ગુરુ દ્રોણ હોય છે. ગુરુ દ્રોણ દુર્યોધન પાસેથી યજ્ઞની દક્ષિણા તરીકે પાંડવોને અડધું રાજ્ય આપવાનું માગે છે. દુર્યોધનને આમ તો આ સ્વીકાર્ય ન હતું છતાં શકુનિએ મૂકેલી એક શરતને આગળ કરીને દુર્યોધન આ દક્ષિણા આપવા તૈયાર થઈ જાય છે. શરત એ હોય છે કે પાંચ જ દિવસમાં પાંડવોની ભાળ મળી જવી જોઈએ.

આ પૃષ્ઠભૂમિમાં, ભીષ્મ પિતામહના કહેવાથી કોઈ કારણસર કૌરવો વિરાટનગર તરફ કૂચ કરે છે અને વિરાટરાજાની ગાયોને હાંકી જાય છે. આ ગોગ્રહણને રોકવા માટે વિરાટરાજાને ત્યાં અજ્ઞાત વેશે બલ્લવના નામે ભીમ અને બૃહન્નલાના નામે રહેલા અર્જુન સક્રિય બને છે અને કૌરવસેનાને હાંકી કાઢે છે. સાથે-સાથે તેઓ અભિમન્યુને પકડી લાવે છે.

આ સમયે વિરાટની રાજસભામાં જે દૃશ્ય રચાય છે, તેનો સંપાદિત અંશ અહીં પ્રસ્તુત છે. વેશપલટો કરીને સાથે રહેલા પિતા અર્જુન તથા કાકા ભીમને અભિમન્યુ ઓળખી શકતો નથી. બન્ને વડીલો અભિમન્યુને ખીજવવાના ઈરાદાથી જે સંવાદ કરે છે, તે ખૂબ જ હાસ્યસભર છે. આ સંવાદ કોઈ પણ પ્રેક્ષકને હાસ્ય રસથી તૃપ્ત કરી દે તેવો મજાનો છે.

અહીં અભિમન્યુના બહાને વિરાટરાજાને તથા સહુને પાંડવોની વાસ્તવિક ઓળખ થાય છે. પેલી બાજુ પાંચ રાત્રિમાં આ રીતે પાંડવોની ભાળ મળી ગઈ હોઈ ગુરુ દ્રોણના કહેવાથી દુર્યોધન પોતાનું અડધું રાજ્ય પાંડવોને આપી દે છે. આમ અહીં યુદ્ધની ઘટનાને ટાળવામાં આવી છે.

બધી ઘટના માત્ર પાંચ રાત્રિમાં સંપન્ન થતી હોઈ, આને પંચરાત્ર એવું નામ આપવામાં આવ્યું છે.]

(प्रविश्य)

भटः : जयतु महाराजः । प्रियं निवेदये महाराजाय । अवजितं गोग्रहणम् । अपयाताः धार्तराष्ट्राः ।

राजा : अपूर्व इव ते हर्षः । ब्रूहि केनासि विस्मितः ।

भटः : अश्रद्धेयं प्रियं प्राप्तं सौभद्रो ग्रहणं गतः ।

राजा : कथमिदानीं गृहीतः ?

भटः : रथमासाद्य निःशङ्कं बाहुभ्यामवतारितः ।

राजा : केन ।

भटः : यः किलैष नरेन्द्रेण महानसे विनियुक्तो बल्लवः, तेन ।

राजा : तेन हि सत्कृत्य प्रवेश्यताम् अभिमन्युः । बृहन्नले, प्रवेश्यताम् अभिमन्युः ।

बृहन्नला : यदाज्ञापयति महाराजः । (निष्क्रान्ता ।)

(ततः प्रविशति अभिमन्युः बृहन्नला बल्लवः च ।)

बृहन्नला : इतः इतः कुमार । अभिमन्यो ।

अभिमन्युः : अभिमन्युर्नाम । कथं कथम् । अभिमन्युः नामाहम् । भोः किं नामभिः अभिभाष्यन्ते क्षत्रियाः अत्र ।

बृहन्नला : अभिमन्यो, सुखम् आस्ते ते जननी ?

अभिमन्युः : कथं कथम् । जननी नाम ।

**किं भवान् धर्मराजो मे भीमसेनो धनञ्जयः ।**
**यन्मां पितृवदाक्रम्य स्त्रीगतां पृच्छसे कथाम् ।।**

बृहन्नला : अभिमन्यो, अपि कुशली देवकीपुत्रः केशवः ।

अभिमन्युः : कथं तत्रभवन्तम् अपि नाम्ना । अथ किम् । अथ किम् । कुशली भवतः संसृष्टः ।

(उभौ परस्परम् अवलोकयतः ।)

अभिमन्युः : कथम् इदानीं सावज्ञम् इव मां हस्यते ?

बृहन्नला : न खलु किञ्चित् । त्वं तु पार्थपुत्रः । जनार्दनः तव मातुलः । त्वं च तरुणः । तथापि तेन पदातिना गृहीतः ।

अभिमन्युः : अलं स्वच्छन्दप्रलापेन । अस्माकं कुले आत्मश्लाघा उचिता नास्ति । रणभूमौ हतेषु शरान् पश्य । मां विना नामान्तरं न भविष्यति ।

बृहन्नला : (आत्मगतम्) सम्यक् आह कुमारः । (प्रकाशम्) एवं वाक्यशौण्डीर्यम् । किमर्थं तेन पदातिना गृहीतः ?



अभिमन्युः : अशस्त्रो मामभिगतस्ततोऽस्मि ग्रहणं गतः ।

राजा : त्वर्यतां त्वर्यताम् अभिमन्युः ।

बृहन्नला : इतः इतः कुमार । एषः महाराजः । उपसर्पतु कुमारः ।

अभिमन्युः : आः कस्य महाराजः ।

बृहन्नला : न, न, ब्राह्मणेन सहास्ते ।

अभिमन्युः : ब्राह्मणेनेति । (उपगम्य) भगवन् अभिवादये ।

भगवान् : एहि एहि वत्स ।

अभिमन्युः : अनुगृहीतः अस्मि ।

राजा : एहि एहि पुत्र ! (आत्मगतम्) कथं मां नाभिवादयति ? अहो उत्सिक्तः खलु अयं क्षत्रियकुमारः । अहमस्य दर्पप्रशमनं करोमि । (प्रकाशम्) अथ केनायं गृहीतः ?

भीमसेनः : महाराज मया बल्लवेन ।

अभिमन्युः : अशस्त्रेण इति कथ्यताम् ।

भीमसेनः : शान्तं पापम् । सहजौ मे प्रहरणं भुजौ । धनुः तु दुर्बलैः गृह्यते ।

अभिमन्युः : किं भवान् मम मध्यमः तातः, यः तत्तुल्यं वदति ।

राजा : पुत्र ! कः अयं मध्यमः नाम ।

अभिमन्युः : श्रूयताम् । यः खलु जरासन्धं पञ्चत्वम् अनयत् सः ।

(ततः प्रविशति उत्तरः ।)

उत्तरः : तात । अभिवादये ।

राजा : आयुष्मान् भव पुत्र । अपि पूजिताः कृतकर्माणः योधाः ।

उत्तरः : पूजिताः । पूज्यतमस्य क्रियतां पूजा ।

राजा : पुत्र, कस्य ।

उत्तरः : इहात्रभवतः धनञ्जयस्य ।

राजा : कथं धनञ्जयस्य इति ।

उत्तरः : अथ किम् । अत्रभवता श्मशानात् निजधनुः तूणी चाक्षयसायके चादाय भीष्मादयः नृपाः भग्नाः वयं च परिरक्षिताः ।

राजा : एवम् एतत् ?

बृहन्नला : प्रसीदतु प्रसीदतु महाराजः ।

उत्तरः : व्यपनयतु शङ्काम् । अयम् एव धनुर्धरः धनञ्जयः ।

बृहन्नला : यदि अहम् अर्जुनः तर्हि अयं भीमसेनः । अयं च राजा युधिष्ठिरः ।

अभिमन्युः : इह अत्रभवन्तः मे पितरः । तेन खलु –

**न रुष्यन्ति मया क्षिप्ता हसन्तश्च क्षिपन्ति माम् ।**
**दिष्ट्या गोग्रहणं स्वन्तं पितरो येन दर्शिताः ॥**

(इति क्रमेण सर्वान् प्रणमति । सर्वे तस्मै आशीर्वादान् वदन्ति ।)

## ટિપ્પણી

**નામ (પુંલ્લિંગ) : भटः** સૈનિક **विराटेश्वरः** વિરાટદેશનો રાજા **धार्तराष्ट्रः** ધૃતરાષ્ટ્રનો પુત્ર, કૌરવ **बल्लवः** વિરાટનગરમાં અજ્ઞાતવાસ દરમિયાન પાચકરૂપે રહેલા ભીમનું નામ **महानसः** રસોડું **उत्तरः** રાજકુમાર ઉત્તર, વિરાટ રાજાનો પુત્ર **धर्मराजः** યુધિષ્ઠિર **मातुलः** મામા **शरः** બાણ **पदातिः** પગે ચાલનારો, પગપાળો **योधः** સૈનિક **धनञ्जयः** અર્જુન **भुजः** હાથ, બાહુ **क्षेपः** અપમાન.

**(સ્ત્રીલિંગ) : बृहन्नला** અજ્ઞાતવાસ દરમિયાન વિરાટનગરમાં નર્તકી રૂપે રહેલા અર્જુનનું નામ

**(નપુંસકલિંગ) : गोग्रहणम्** ગાયો પકડી લેવી તે **वाक्यशौण्डीर्यम्** બોલવાની ચતુરાઈ, વાણીવિલાસ, માત્ર વાણીમાંની શૂરતા **प्रहरणम्** હથિયાર

**વિશેષણ : अश्रद्धेय** વિશ્વાસ ન કરી શકાય તેવું **स्त्रीगत** સ્ત્રીને લગતું, સ્ત્રી વિશેનું **संसृष्ट** સગપણવાળું, જોડાયેલું **उत्सिक्त** અભિમાની, ઉછાંછળો **कृतकर्मा** જેમણે નોંધપાત્ર કામગીરી કરી છે તે **पूज्यतम** સૌથી વધારે પૂજવા લાયક **स्वन्त** (सु + अन्त) સારા અંતવાળું, સુખાન્ત

**સમાસ :** विराटेश्वरः (विराटानाम् ईश्वरः विराटेश्वरः, षष्ठी तत्पुरुष) । गोग्रहणम् (गवां ग्रहणम् गोग्रहणम् । षष्ठी तत्पुरुष) । नरेन्द्रेण (नरेषु इन्द्रः नरेन्द्रः, तेन । सप्तमी तत्पुरुष) । देवकीपुत्रः (देवक्याः पुत्रः देवकीपुत्रः । षष्ठी तत्पुरुष) । युद्धपराजयः (युद्धे पराजयः युद्धपराजयः । सप्तमी तत्पुरुष) । आत्मश्लाघा (आत्मनः श्लाघा आत्मश्लाघा, षष्ठी तत्पुरुष) रणभूमौ (रणस्य भूमिः रणभूमिः, तस्याम् । षष्ठी तत्पुरुष) । वाक्यशौण्डीर्यम् (वाक्येषु शौण्डीर्यम् वाक्यशौण्डीर्यम् । सप्तमी तत्पुरुष) । दर्पप्रशमनम् (दर्पस्य प्रशमनम् दर्पप्रशमनम् । षष्ठी तत्पुरुष) । तत्तुल्यम् (तेन तुल्यम् तत्तुल्यम् । तृतीया तत्पुरुष) । कण्ठश्लिष्टेन (कण्ठे श्लिष्टः कण्ठश्लिष्टः, तेन । सप्तमी तत्पुरुष) ।

**ક્રિયાપદ : પ્રથમ ગણ :** (પરસ્મૈપદ) **नी** (**नयति**) લઈ જવું

(આત્મનેપદ) **रम्** (**रमते**) રમવું, ખુશ થવું

**ચતુર્થ ગણ :** (પરસ્મૈપદ) **रुष्** (**रुष्यति**) રોષે ભરાવું, ગુસ્સે થવું.

**ષષ્ઠ ગણ :** (પરસ્મૈપદ) **प्रच्छ्** (**पृच्छति**) પૂછવું, પ્રશ્ન કરવો (અહીં અપવાદ રૂપે આ ધાતુ આત્મનેપદમાં વપરાયો છે-पृच्छसे) **क्षिप्** (**क्षिपति**) ફેંકવું, અપમાન કરવું.

**દશમ ગણ :** (પરસ્મૈપદ) **अव + लोक्** (**अवलोकयति**) જોવું, દેખવું.

(આત્મનેપદ) **नि + विद्** (**निवेदयते**) નિવેદન કરવું **अभि + वद्** (**अभिवादयते**) અભિવાદન કરવું, પ્રણામ કરવા

## વિશેષ

**(1) શબ્દાર્થ : जयतु** જય થાવો. **अवजितम्** જીતી લીધું. **अपयाताः** નાસી ગયા છે. **निःशङ्कम्** શંકા કર્યા વગર, શંકા કે ડર વિના **विनियुक्तः** નીમેલો, નિયુક્ત કરેલો **सत्कृत्य** સત્કાર કરીને **प्रवेश्यताम्** પ્રવેશ કરાવો. લઈ આવો. **नामभिः** નામના ઉચ્ચારણ દ્વારા, નામથી **अभिभाष्यन्ते** બોલાવવામાં આવે છે. બોલાવે છે. **पितृवत्** વડીલની જેમ, પિતાની જેમ **आक्रम्य** આક્રમણ કરીને, હુમલો કરીને **स्त्रीगताम्** સ્ત્રીને લગતી, સ્ત્રી વિશેની **कथाम्** કથા, વાત **सावज्ञम्** અવજ્ઞા સાથે, મશ્કરીપૂર્વક **हस्यते** હસવામાં આવી રહ્યું છે.

**अलं स्वच्छन्दप्रलापेन** ફાવે એમ બોલવાનું રહેવા દો. મન ફાવે તેમ બોલશો નહીં. **आत्मश्लाघा** આપવડાઈ, પોતાની જાતની ભાટાઈ **पदातिना** પગપાળા દ્વારા, પગે ચાલતા સૈનિક વડે **अशस्त्रः** શસ્ત્ર વગરનો, નિઃશસ્ત્ર **अभिगतः** સામે આવેલો **त्वर्यताम्** ઉતાવળ કરો. જલદી કરો. **उत्सिक्तः** ઘમંડી, ઉછાંછળો **दर्पप्रशमनम्** ગુસ્સાને શાન્ત કરવો તે, દર્પને - ગુસ્સાને નાબુદ કરવો તે **कथ्यताम्** કહો. **शान्तं पापम्** પાપ શાંત થાઓ. (સંસ્કૃતમાં ગુસ્સે ભરાયેલી વ્યક્તિને કે તેવા વાતાવરણને શાંત કરવા માટે આવો રૂઢ પ્રયોગ થાય છે. ગુજરાતીમાં 'બસ કરો, હવે બસ કરો' કહીએ એમ. **सहजौ** સહજ, કુદરતી, સાથે જન્મેલા (द्वि.) **प्रहरणम्** હથિયાર **निजधनुः** પોતાનું ધનુષ્ય **तूणी अक्षयसायके** ખૂટે નહીં એવાં બાણવાળાં બે ભાથાંઓ **आदाय** લઈને **भग्नाः** ભાગી ગયા **परिरक्षिताः** બચાવ્યા. **प्रसीदतु** કૃપા કરો. ખુશ થાઓ. પ્રસન્ન થાઓ. **व्यपनयतु** દૂર કરો. **क्षिप्ता** આક્ષેપ કરવામાં આવેલા **हसन्तः** હસતા **दिष्ट्या** સદ્‌નસીબે, સદ્‌ભાગ્યે **गोग्रहणम्** ગાયોનું ગ્રહણ, ગાયોનું અપહરણ **स्वन्तम्** સારા અન્તવાળું (सु-अन्तम्).

**(2) સન્ધિ :** अपूर्व इव ते हर्षो ब्रूहि केनासि (अपूर्वः इव ते हर्षः ब्रूहि केन असि) । सौभद्रो ग्रहणम् (सौभद्रः ग्रहणम्) । किलैषः (किल एषः) । उत्तरेणाद्य (उत्तरेण अद्य) । यन्मां पितृवदाक्रम्य (यत् मां पितृवत् आक्रम्य) । अशस्त्रो मामभिगतस्ततोऽहम् (अशस्त्रः माम् अभिगतः ततः अहम्) । चाक्षयसायके (च अक्षयसायके) । चादाय (च आदाय) ।

## સ્વાધ્યાય

**1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) ब्रूहि केनासि विस्मितः । इति वचनं कस्य ? ◯

(क) भटस्य (ख) विराटेश्वरस्य (ग) उत्तरस्य (घ) बृहन्नलायाः

(2) नरेन्द्रेण महानसे कः विनियुक्तः ? ◯

(क) बल्लवः (ख) अर्जुनः (ग) भटः (घ) उत्तरः

(3) कथमिदानीम् ............. इव मां हस्यते ? ◯

(क) अनभिज्ञम् (ख) सावज्ञम् (ग) अपरिचितम् (घ) निरवज्ञम्

(4) धनुः कैः गृह्यते ? ◯

(क) दुर्बलैः (ख) सैनिकैः (ग) राक्षसैः (घ) योधैः

(5) पितरः केन दर्शिताः ? ◯

(क) गोग्रहणेन (ख) उत्तरेण (ग) बल्लवेन (घ) भटेन

**2. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत ।**

(1) भटः किं प्रियं निवेदयति ?

(2) अभिमन्युः केन गृहीतः ?

(3) बृहन्नला कस्य कस्य विषये अभिमन्युं पृच्छति ?

(4) भीमसेनस्य सहजं प्रहरणं किम् अस्ति ?

(5) उत्तरः कस्य पूजां कर्तुं कथयति ?

Edubox Your Desktop Tutor

3. **निम्नलिखितेषु वाक्येषु कः भावः प्रकटितः तत्प्रकोष्ठगतेभ्यः शब्देभ्यः विचित्य लिखत ।**

(1) कथं कथम् । अभिमन्युः नाम अहम् । (आत्मप्रशस्तिः, दैन्यम्, अभिमानः)

(2) यन्मां पितृवदाक्रम्य स्त्रीगतां पृच्छसे कथाम् । (क्रोधः, विस्मयः, तिरस्कारः)

(3) धनुस्तु दुर्बलैः गृह्यते । (उत्साहः, शौर्यम्, अहङ्कारः)

(4) दिष्ट्या गोग्रहणं स्वन्तं पितरो येन दर्शिताः । (हर्षः, धैर्यम्, निन्दा)

4. **अधोलिखितानां धातुरूपाणां धातु-गण-पद-काल/लकार-पुरुष-वचननिर्देशकपूर्वकं परिचयं कारयत ।**

(1) रुष्यन्ति ............... ............... ............... ............... ...............

(2) वदति ............... ............... ............... ............... ...............

(3) पृच्छसे ............... ............... ............... ............... ...............

(4) भविष्यति ............... ............... ............... ............... ...............

(5) प्रविशति ............... ............... ............... ............... ...............

5. **मातृभाषायाम् उत्तराणि लिखत ।**

(1) ભટ મહારાજને શું સમાચાર આપે છે ?

(2) પોતાની માતાની બાબતમાં પૂછવામાં આવતાં અભિમન્યુની પ્રતિક્રિયા શી હોય છે ?

(3) શસ્ત્રને વિશે ભીમનો શો મત છે ?

(4) ધનંજયે શું કર્યું હતું ?

(5) ગોગ્રહણની ઘટનાથી અભિમન્યુને શો ફાયદો થયો ?

6. **क-विभागं ख-विभागेन सह संयोजयत ।**

| क | ख |
|---|---|
| (1) अश्रद्धेयं प्रियं प्राप्तं सौभद्रो ग्रहणं गतः । | (1) अभिमन्युः |
| (2) पूज्यतमस्य क्रियतां पूजा । | (2) भटः |
| (3) अशस्त्रेण इति कथ्यताम् । | (3) बृहन्नला |
| (4) सुखमास्ते ते जननी । | (4) भगवान् |
| (5) एहि एहि वत्स । | (5) उत्तरः |
| | (6) बल्लवः |

Edubox TM Your Desktop Tutor

**પ્રવૃત્તિઓ**

- ભાસનાં તેર નાટકોનાં નામ લખો.
- पञ्चरात्रम् પુસ્તક મેળવીને તેનું કથાનક વાંચો.